**B.A. (Honours) Examination 2016**
**Semester-I**
**Sanskrit (Honours)**
**Course : H-1**
**[Rāmāyana, History of Sanskrit Literature]**

**Time : 3 Hours** **Full Marks : 40**

Questions are of value as indicated in the margin

1. वङ्गभाषया हिन्दीभाषया आङ्गलभाषया वा कञ्चिदेकमनुवदत– 8

(क) ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः।
चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात्।।
रम्यमावसथं कृत्वा रममाणा वने त्रयः।
देवगन्धर्वसंकाशास्तत्र ते न्यवसन् सुखम्।।

(ख) रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः।।
सर्वशास्त्रार्थतत्वज्ञः स्मृतिमान् प्रतिभानवान्।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः।।

2. अधस्तनेषु कश्चिदेकः श्लोको व्याख्यायताम्– 7

(क) स काममनवाप्यैव रामपादावुपस्पृशन्।
नन्दिग्रामेऽकरोद् राज्यं रामागमनकाङ्क्षया।।

(ख) स जगाम वनं वीरः प्रतिज्ञामनुपालयन्।
पितुर्वचननिर्देशात् कैकेय्याः प्रियकारणात्।।

(ग) बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः।
मुने वक्ष्याम्यहं बुद्ध्वा तैर्युक्तः श्रूयतां नरः।।

3. अधोलिखितेषु प्रश्नेषु द्वयोरुत्तरं प्रदीयताम्— 10×2=20

(क) संस्कृत-पद्यकाव्यस्य परिचयमेकं प्रयच्छत।
(ख) रामायण-महाभारतयोः पौर्वापर्यविषये सन्दर्भमेकं रचयत।
(ग) पुराणस्य लक्षणं भेदांश्चोल्लिख्य तेषु पुराणत्रयस्य विश्लेषणं कुरुत।
(घ) भाससमस्यामवलम्ब्य संदर्भमेकं रचयत।

4. अधस्तनेषु कस्यचिदेकस्य संक्षिप्तं विवरणं प्रदीयताम्– 5

मेघदूतम्, मृच्छकटिकम्, श्रीमद्भगवद्गीता, कादम्बरी।